# 2025

BAGNAN COLLEGE ESTD 1958 Bagnan, Howrah

## SANSKRIT — HONOURS

**Paper : DSCC-12**

**(Indian Epigraphy)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Unit - I

**(Marks : 20)**

1. अधोलिखितयोः ***कस्यचिदेकस्य*** उत्तरं दीयताम्।

(a) अभिलेखपदस्य कोऽर्थः? प्राचीनभारतेतिहासचर्चायाम् अभिलेखशास्त्राध्ययनस्य प्रयोजनम् आलोच्यताम्। 2+8

(b) अभिलेखानां प्रकारभेदाः उदाहरणेन सह आलोचनीयाः। 10

2. अधोलिखितेषु यथामति ***पञ्चप्रश्नाः*** समाधेयाः। 2×5

(a) भारते 'Asiatic Society' नाम प्रतिष्ठानं केन कदा च प्रतिष्ठितम्?

(b) आङ्गलशासनकाले माद्राजसर्वकारस्य प्रथमोऽभिलेखविद् कः आसीत्? तस्य प्रसिद्धग्रन्थस्य नामोल्लेखं कुरु।

(c) द्वितीयपुलकेशिनः आइहोल-प्रशस्त्यां कस्य कविद्वयस्य उल्लेखो वर्तते?

(d) केन विदुषा प्रथमतः आदिब्राह्मीलिपेः पाठोद्धारे साफल्यं प्राप्तम्? तस्य सहकारिषु एकस्य नामोल्लेखः कार्यः।

(e) 'Indian Palaeography' इति ग्रन्थस्य रचयिता कः? तस्य पितृभूमेः नामोल्लेखं कुरु।

(f) प्रशस्तिमूलकयोः द्वयोरभिलेखयोरुल्लेखः कार्यः। तयोः प्रणेतारौ च उल्लिख्येताम्।

(g) 'Archaeological Survey of India' इति प्रतिष्ठानं कदा प्रतिष्ठितम्? क आसीत् तस्य प्रथमः सर्वाधिकारी?

### Unit - II

**(Marks : 35)**

3. निम्नलिखितयोः ***एकतरस्य*** उत्तरं प्रदीयताम्।

(a) प्रथमरुद्रदाम्नो जुनागडलेखानुसारं सुदर्शनतडागस्य सेतुः कदा कथं च भग्नो जातः? अत्र सुदर्शनसेतोः कीदृशम् इतिवृत्तमुपलभ्यते? तस्य संस्कारार्थं रुद्रदाम्ना कीदृशः उद्योगः कृतः? 1+3+2+4

(b) प्रयागस्तम्भलेखे कस्य प्रशस्तिः कृता? केन वा प्रशस्तिरियं रचिता? तदभिलेखम् अनुसृत्य दाक्षिणात्यस्य राज्यानां भौगोलिकावस्थानम् आलोच्यताम्। 1+1+8

4. अधोलिखितेषु विषयेषु यथामति ***टीकात्रयं*** लेख्यम्। 5×3

(a) समाजः

(b) अनुपोसथं

(c) सुविशाखः

(d) उपरिकः

(e) कुमारगुप्तः

5. अधोलिखितेषु यथामति **पञ्चप्रश्नाः** समाधेयाः। 2×5

(a) रुद्रदाम्नः जुनागड् इत्यभिलेखस्य प्रचारकालः उल्लेखनीयः। तस्य पितामहस्य नामोल्लेखं कुरु।

(b) कस्मिन् राज्यवर्षे खारवेलेन ऋषिकनगरम् अधिकृतम्? कस्मिन् नदीतीरे सा नगरी अधिष्ठिता?

(c) 'भ्रष्टराजप्रतिष्टापकेन' इत्यस्य कोऽर्थः?

(d) तिलभट्टः कः? कस्मिन् लेखे तस्य नामोल्लेखः दृष्टः?

(e) प्रथमरुद्रदाम्नः पितुः पितामहस्य च नामोल्लेखः कार्यः।

(f) "__________ गिरौ भगवतो __________ स्थापितः"– इत्यत्र शून्यस्थानं पूरणीयम्।

(g) "लिच्छविदौहित्रस्य __________ __________ उत्पन्नस्य"– इत्यत्र शून्यस्थानं पूरणीयम्।

**Unit - III**

**(Marks : 20)**

6. अधोलिखितेषु यथामति ***विषयद्वयस्य*** टीका कार्या। 5×2

(a) विक्रमाब्दः

(b) गुप्ताब्दः

(c) शकाब्दः

(d) अमात्यः।

7. अधोलिखितेषु ***द्वयोः*** सङ्केतयोः गाणितिकसंख्याभिः परिवर्तनं कृत्वा उल्लिखिताब्दानुसारं ख्रिष्टाब्दे परिणमयत। 5×2

(a) अचलारातिषडिन्दुपरिमिते शकाङ्कवर्षे।

(b) तुरगाश्ववेदाङ्कक्षमातमे विक्रमाब्दे।

(c) ब्रह्मरसार्णववसुधरावर्षे शाके।

(d) मालवानां गणस्थित्या शतचतुष्टये त्रिनवत्यधिकेऽब्दानाम्।